संस्कृत-वार्ता:

दिनाङ्क :- 13.06.2025 प्रात: - 06:55

**अथ वार्ताः**

## विमान-दुर्घटना

गुजरात्-राज्यस्य अहमदाबाद्-विमानस्थानकं निकषा, द्विचत्वारिंशदधिक-द्विशतजनैः सह लण्डन्-नगरं प्रति गम्यमानं एयर्-इण्डिया इत्यस्य विमानं ए. आई.-171 इति पतितम्। यस्मिन् द्वाभ्यां वैमानिकाभ्यां सह दश क्याबिन्-क्रू-इति सदस्याश्च आसन्। विमानमिदं गुजरातस्य अहमदाबाद्-विमानस्थानकस्य समीपे मेघानीनगरक्षेत्रे पतितम्। दुर्भाग्येण विमाने नवषष्ट्युत्तरैकशतभारतीयाः, त्रिपञ्चाशत् ब्रिटिश्-जनाः, एकः केनडा-देशीयः, सप्त पोर्तुगीस्-नागरिकाश्च आसन्। ह्यः विमानदुर्घटनायाः होरैकानन्तरं केन्द्रीय-गृह-मन्त्री अमितशाहः अहमदाबाद्-नगरं गतवान्। सः नागरिक-विमानयान-मन्त्रिणा राममोहन-नायडु-वर्येण, गुजरातस्य मुख्यमन्त्रिणा भूपेन्द्र-पटेलेन वरिष्ठैः अधिकारिभिश्च सह साहाय्य-उद्धार-कार्याणां समीक्षां कृतवान्। उपवेशनानन्तरं प्रसारमाध्यमैः सह वार्तालापं कुर्वन्, श्रीशाहः अवदत् यत् दुर्भाग्यपूर्णघटनायाः कारणेन सम्पूर्णः देशः स्तब्धः अस्ति, तथा च देशस्य सर्वे नागरिकाः अस्यां दुर्घटनायां शोकभावान् प्रकटयन्तीति।

सः एतदपि दृढीकृतवान् यत् नागरिक-विमानयान-मन्त्रालयः घटनायाः कारणं ज्ञातुं औपचारिक-अन्वेषणं प्रारभत इति।

गृहमन्त्री अहमदाबाद्-नगरस्य लोक-चिकित्सालयस्य ट्रामा इति केन्द्रम् अपि अगच्छत्, यत्र अनेके व्रणिताः उपचाराधीनाः सन्ति। सः चिकित्सा-व्यवस्थायाः समीक्षाम् अकरोत्, आपत्कालीन-परिचर्यायाः पर्यवेक्षमाणैः चिकित्सकैः अधिकारिभिश्च सह वार्तालापम् अकरोत्। गुजरात्-सर्वकारः पीडितपरिवाराणाम् अभिज्ञानार्थं डी. एन्. ए. इत्यस्य प्रतिदर्शान् दातुं प्रार्थयति; दुर्घटनायां मृतानां मध्ये गुजरातस्य पूर्वमुख्यमन्त्री विजय रुपाणी अपि अस्ति।

दुर्घटनाग्रस्ते विमाने एकः यात्री लघु-व्रणैः सह जीवितः प्राप्तः।

राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च प्रकरणेऽस्मिन् शोकं प्रकटितवन्तः।

सेना तथा एन्. डी. आर्. एफ़्.इत्यस्य राष्ट्रिय-आपदुद्धार-दलानि मानवीयसहायतायां विपद्-निवारणप्रयासेषु च संलग्नानि आसन्।

## विश्वनेतॄणां संवेदनाः

अहमदाबाद्-विमानदुर्घटनायां पीडितानां जनानां कृते सम्पूर्णे विश्वे नेतारः शोकं प्रकटितवन्तः। संयुक्तराष्ट्रसङ्घस्य महासचिवः आन्टोनियो गुट्टरसः पीडितानां परिवारान् प्रति शोकं प्रकटितवान्, सः व्रणितेभ्यः शीघ्रं स्वस्थतां प्रार्थयत्। अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन एतत् भयानकं दुःखम् इति उक्तम्, सहाय्यसमर्थनञ्च दत्तम्। यू. के. प्रधानमन्त्री कीर् स्टार्मर् अवदत् यत् सः अतीव दुःखितः अस्ति, विशेषतः यतः बहवः ब्रिटिश्-नागरिकाः विमाने आसन् इति। रशियादेशस्य राष्ट्रपतिना व्लादिमिर् पुटिन् इत्यनेन राष्ट्रपतिना द्रौपदी मुर्मू इत्यस्यै, प्रधानमन्त्रिणे नरेन्द्रमोदिने च शोकसंदेशः प्रेषितः।

**एन. आई. ए.-अन्वेषणम्**

अमृत्सर्-आरक्षक-स्थले-ग्रिनेड्- इत्यनेन कृताक्रमण-प्रकरणे राष्ट्रिय-अन्वेषण-संस्था, बब्बर्-खाल्सा-इण्टर्न्याशनल् इति आततायिदलं विरुध्य भयोत्पादक-सङ्घटनायाः विषये पञ्जाब्-हरियाणा-प्रदेशयोः अनेकस्थानेषु अन्वेषणं कृतवती।

**ग्यान् पोस्ट्ः**

डाकेति-विभागेन शैक्षणिकानां, सांस्कृतिकानां, सामाजिकानां, धार्मिकानाञ्च पुस्तकानां सुलभ-वितरणार्थं 'ज्ञानपोस्ट्' इति समर्पित-डाक-सेवा आरब्धा। एषः उपक्रमः नूतनशिक्षानीतेः (एन्. ई. पी.) उद्देश्यैः सह संरेखितः अस्ति, तथा च मुद्रित-शैक्षणिक-सामग्रीं सुलभतरं कृत्वा शैक्षणिकविभाजनं पूरयितुं लक्ष्ययति।

**अपि च**

**मौसम**

दिल्ली, पञ्जाब्, हरियाणा, चण्डीगढ, जम्मू-कश्मीर् इत्येतेषु प्रदेशेषु शनिवासरपर्यन्तं तीव्र-उष्णतरङ्गस्य स्थितिः भवेत् इति भारतीयर्तुविज्ञानविभागस्य पूर्वानुमानम् अस्ति।

**इति वार्ताः**